# 125 Names of
# Āditya

॥ श्रीः ॥

## Including the Āditya Hṛdayam

**Compiled and edited under the guidance of**
**Śrī Svāmī Vāgīśānanda Sarasvatī**

ॐPress

# 125 Names of Āditya

ॐ अथ आदित्य पञ्चविंशत्युत्तरशतनामावलिः ॥

Oṁ atha āditya pañcaviṁśatyuttaraśatanāmāvaliḥ

ॐ रश्मिमते नमः ॥ १ ॥

oṁ raśmimate namaḥ **1**

ॐ समुद्यते नमः ॥ २ ॥

oṁ samudyate namaḥ **2**

ॐ देवासुरनमसकृताय नमः ॥ ३ ॥

oṁ devāsuranamasakṛtāya namaḥ **3**

ॐ विवस्वते नमः ॥ ४ ॥

oṁ vivasvate namaḥ **4**

ॐ भास्कराय नमः ॥ ५ ॥

oṁ bhāskarāya namaḥ **5**



ॐ भुवनेश्वराय नमः ॥ ६ ॥

oṁ bhuvaneśvarāya namaḥ **6**

ॐ सर्वदेवात्मकाय नमः ॥ ७ ॥

oṁ sarvadevātmakāya namaḥ **7**

ॐ तेजस्विने नमः ॥ ८ ॥

oṁ tejasvine namaḥ **8**

ॐ रश्मिभावनाय नमः ॥ ७ ॥

oṁ raśmibhāvanāya namaḥ **9**

ॐ देवासुरगणलोकपालाय नमः ॥ १० ॥

oṁ devāsuragaṇalokapālāya namaḥ **10**

ॐ ब्रह्मणे नमः ॥ ११ ॥

oṁ brahmaṇe namaḥ **11**

ॐ विष्णवे नमः ॥ १२ ॥

oṁ viṣṇave namaḥ **12**

ॐ शिवाय नमः ॥ १३ ॥

oṁ śivāya namaḥ **13**

ॐ स्कन्दाय नमः ॥ १४ ॥

oṁ skandāya namaḥ **14**

ॐ प्रजापतये नमः ॥ १५ ॥

oṁ prajāpataye namaḥ **15**

ॐ महेन्द्राय नमः ॥ १६ ॥

oṁ mahendrāya namaḥ **16**

ॐ धनदाय नमः ॥ १७ ॥

oṁ dhanadāya namaḥ **17**

ॐ कालाय नमः ॥ १८ ॥

oṁ kālāya namaḥ **18**

ॐ यमाय नमः ॥ १९ ॥

oṁ yamāya namaḥ **19**

ॐ सोमाय नमः ॥ २० ॥

oṁ somāya namaḥ **20**

ॐ अपां पतये नमः ॥ २१ ॥

oṁ apāṁ pataye namaḥ **21**



ॐ पितृदेवतायै नमः ॥ २२ ॥

oṁ pitṛdevatāyai namaḥ **22**

ॐ वसुमूर्तये नमः ॥ २३ ॥

oṁ vasumūrtaye namaḥ **23**

ॐ साध्यमूर्तये नमः ॥ २४ ॥

oṁ sādhyamūrtaye namaḥ **24**

ॐ अश्विमूर्तये नमः ॥ २५ ॥

oṁ aśvimūrtaye namaḥ **25**

ॐ मरुन्मूर्तये नमः ॥ २६ ॥

oṁ marunmūrtaye namaḥ **26**

ॐ मनवे नमः ॥ २७ ॥

oṁ manave namaḥ **27**

ॐ वायुमूर्तये नमः ॥ २८ ॥

oṁ vāyumūrtaye namaḥ **28**

ॐ वह्नये नमः ॥ २९ ॥

oṁ vahnaye namaḥ **29**

ॐ प्रजारूपाय नमः ॥ ३० ॥

oṁ prajārūpāya namaḥ **30**

ॐ प्राणाय नमः ॥ ३१ ॥

oṁ prāṇāya namaḥ **31**

ॐ ऋतुकर्त्रे नमः ॥ ३२ ॥

oṁ ṛtukartre namaḥ **32**

ॐ प्रभाकराय नमः ॥ ३३ ॥

oṁ prabhākarāya namaḥ **33**

ॐ आदित्याय नमः ॥ ३४ ॥

oṁ ādityāya namaḥ **34**

ॐ सवित्रे नमः ॥ ३५ ॥

oṁ savitre namaḥ **35**

ॐ सूर्याय नमः ॥ ३६ ॥

oṁ sūryāya namaḥ **36**

ॐ खगाय नमः ॥ ३७ ॥

oṁ khagāya namaḥ **37**



ॐ पूष्णे नमः ॥ ३८ ॥

oṁ pūṣṇe namaḥ **38**

ॐ गभस्तिमते नमः ॥ ३९ ॥

oṁ gabhastimate namaḥ **39**

ॐ सुवर्णसदृशाय नमः ॥ ४० ॥

oṁ suvarṇasadṛśāya namaḥ **40**

ॐ भानवे नमः ॥ ४१ ॥

oṁ bhānave namaḥ **41**

ॐ हिरण्यरेतसे नमः ॥ ४२ ॥

oṁ hiraṇyaretase namaḥ **42**

ॐ दिवाकराय नमः ॥ ४३ ॥

oṁ divākarāya namaḥ **43**

ॐ हरिदश्वाय नमः ॥ ४४ ॥

oṁ haridaśvāya namaḥ **44**

ॐ सहस्रार्चिषे नमः ॥ ४५ ॥

oṁ sahasrārciṣe namaḥ **45**

ॐ सप्तसप्तये नमः ॥ ४६ ॥

oṁ saptasaptaye namaḥ **46**

ॐ मरीचिमते नमः ॥ ४७ ॥

oṁ marīcimate namaḥ **47**

ॐ तिमिरोन्मथनाय नमः ॥ ४८ ॥

oṁ timironmathanāya namaḥ **48**

ॐ शम्भवे नमः ॥ ४८ ॥

oṁ śambhave namaḥ **49**

ॐ त्वष्ट्रे नमः ॥ ५० ॥

oṁ tvaṣṭre namaḥ **50**

ॐ मार्तण्डकाय नमः ॥ ५१ ॥

oṁ mārtaṇḍakāya namaḥ **51**

ॐ अंशुमते नमः ॥ ५२ ॥

oṁ aṁśumate namaḥ **52**

ॐ हिरण्यगर्भाय नमः ॥ ५३ ॥

oṁ hiraṇyagarbhāya namaḥ **53**



ॐ शिशिराय नमः ॥ ५४ ॥

oṁ śiśirāya namaḥ **54**

ॐ तपनाय नमः ॥ ५५ ॥

oṁ tapanāya namaḥ **55**

ॐ अहस्कराय नमः ॥ ५६ ॥

oṁ ahaskarāya namaḥ **56**

ॐ रवये नमः ॥ ५७ ॥

oṁ ravaye namaḥ **57**

ॐ अग्निगर्भाय नमः ॥ ५८ ॥

oṁ agnigarbhāya namaḥ **58**

ॐ अदितेः पुत्राय नमः ॥ ५९ ॥

oṁ aditeḥ putrāya namaḥ **59**

ॐ शङ्खाय नमः ॥ ६० ॥

oṁ śaṅkhāya namaḥ **60**

ॐ शिशिरनाशनाय नमः ॥ ६१ ॥

oṁ śiśiranāśanāya namaḥ **61**

ॐ व्योमनाथाय नमः ॥ ६२ ॥

oṁ vyomanāthāya namaḥ **62**

ॐ तमोभेदिने नमः ॥ ६३ ॥

oṁ tamobhedine namaḥ **63**

ॐ ऋग्यजुस्सामपारगाय नमः ॥ ६४ ॥

oṁ ṛgyajussāmapāragāya namaḥ **64**

ॐ घनवृष्टये नमः ॥ ६५ ॥

oṁ ghanavṛṣṭaye namaḥ **65**

ॐ अपां मित्राय नमः ॥ ६६ ॥

oṁ apāṁ mitrāya namaḥ **66**

ॐ विन्ध्यवीथीप्लवङ्गमाय नमः ॥ ६७ ॥

oṁ vindhyavīthīplavaṅgamāya namaḥ **67**

ॐ आतपिने नमः ॥ ६८ ॥

oṁ ātapine namaḥ **68**

ॐ मण्डलिने नमः ॥ ६९ ॥

oṁ maṇḍaline namaḥ **69**



ॐ मृत्यवे नमः ॥ ७० ॥

oṁ mṛtyave namaḥ **70**

ॐ पिङ्गलाय नमः ॥ ७१ ॥

oṁ piṅgalāya namaḥ **71**

ॐ सर्वतापनाय नमः ॥ ७२ ॥

oṁ sarvatāpanāya namaḥ **72**

ॐ कवये नमः ॥ ७३ ॥

oṁ kavaye namaḥ **73**

ॐ विश्वस्मै नमः ॥ ७४ ॥

oṁ viśvasmai namaḥ **74**

ॐ महातेजसे नमः ॥ ७५ ॥

oṁ mahātejase namaḥ **75**

ॐ रक्ताय नमः ॥ ७६ ॥

oṁ raktāya namaḥ **76**

ॐ सर्वभवोद्भवाय नमः ॥ ७७ ॥

oṁ sarvabhavodbhavāya namaḥ **77**

ॐ नक्षत्रग्रहताराणामधिपाय नमः ॥ ७८ ॥

oṁ nakṣatragrahatārāṇāmadhipāya namaḥ **78**

ॐ विश्वभावनाय नमः ॥ ७९ ॥

oṁ viśvabhāvanāya namaḥ **79**

ॐ तेजसामपि तेजस्विने नमः ॥ ८० ॥

oṁ tejasāmapi tejasvine namaḥ **80**

ॐ द्वादशात्मने नमः ॥ ८१ ॥

oṁ dvādaśātmane namaḥ **81**

ॐ पूर्वाय गिरये नमः ॥ ८२ ॥

oṁ pūrvāya giraye namaḥ **82**

ॐ पश्चिमायाद्रये नमः ॥ ८३ ॥

oṁ paścimāyādraye namaḥ **83**

ॐ ज्योतिर्गणानां पतये नमः ॥ ८४ ॥

oṁ jyotirgaṇānāṁ pataye namaḥ **84**

ॐ दिनाधिपतये नमः ॥ ८५ ॥

oṁ dinādhipataye namaḥ **85**



ॐ जयाय नमः ॥ ८६ ॥

oṁ jayāya namaḥ **86**

ॐ जयभद्राय नमः ॥ ८७ ॥

oṁ jayabhadrāya namaḥ **87**

ॐ हर्यश्वाय नमः ॥ ८८ ॥

oṁ haryaśvāya namaḥ **88**

ॐ सहस्रांशवे नमः ॥ ८९ ॥

oṁ sahasrāṁśave namaḥ **89**

ॐ अदित्याय नमः ॥ ९० ॥

oṁ adityāya namaḥ **90**

ॐ उग्राय नमः ॥ ९१ ॥

oṁ ugrāya namaḥ **91**

ॐ वीराय नमः ॥ ९२ ॥

oṁ vīrāya namaḥ **92**

ॐ सारङ्गाय नमः ॥ ९३ ॥

oṁ sāraṅgāya namaḥ **93**

ॐ पद्मप्रबोधाय नमः ॥ ९४ ॥

oṁ padmaprabodhāya namaḥ **94**

ॐ प्रचण्डाय नमः ॥ ९५ ॥

oṁ pracaṇḍāya namaḥ **95**

ॐ ब्रह्मेशानाच्युतेशाय नमः ॥ ९६ ॥

oṁ brahmeśānācyuteśāya namaḥ **96**

ॐ सूराय नमः ॥ ९७ ॥

oṁ sūrāya namaḥ **97**

ॐ आदित्यवर्चसे नमः ॥ ९८ ॥

oṁ ādityavarcase namaḥ **98**

ॐ भास्वते नमः ॥ ९९ ॥

oṁ bhāsvate namaḥ **99**

ॐ सर्वभक्षाय नमः ॥ १०० ॥

oṁ sarvabhakṣāya namaḥ **100**

ॐ रौद्राय वपुषे नमः ॥ १०१ ॥

oṁ raudrāya vapuṣe namaḥ **101**



ॐ तमोघ्नाय नमः ॥ १०२ ॥

oṁ tamoghnāya namaḥ **102**

ॐ हिमघ्नाय नमः ॥ १०३ ॥

oṁ himaghnāya namaḥ **103**

ॐ शत्रुघ्नाय नमः ॥ १०४ ॥

oṁ śatrughnāya namaḥ **104**

ॐ अमितात्मने नमः ॥ १०५ ॥

oṁ amitātmane namaḥ **105**

ॐ कृतघ्नघ्नाय नमः ॥ १०६ ॥

oṁ kṛtaghnaghnāya namaḥ **106**

ॐ देवाय नमः ॥ १०७ ॥

oṁ devāya namaḥ **107**

ॐ ज्योतिषां पतये नमः ॥ १०८ ॥

oṁ jyotiṣāṁ pataye namaḥ **108**

ॐ तप्तचामीकराभाय नमः ॥ १०९ ॥

oṁ taptacāmīkarābhāya namaḥ **109**

ॐ हरये नमः ॥ ११० ॥

oṁ haraye namaḥ **110**

ॐ विश्वकर्मणे नमः ॥ १११ ॥

oṁ viśvakarmaṇe namaḥ **111**

ॐ तमोऽभिनिघ्नाय नमः ॥ ११२ ॥

oṁ tamo'bhinighnāya namaḥ **112**

ॐ रुचये नमः ॥ ११३ ॥

oṁ rucaye namaḥ **113**

ॐ लोकसाक्षिणे नमः ॥ ११४ ॥

oṁ lokasākṣiṇe namaḥ **114**

ॐ भूतनाशाय नमः ॥ ११५ ॥

oṁ bhūtanāśāya namaḥ **115**

ॐ भूतस्रष्ट्रे नमः ॥ ११६ ॥

oṁ bhūtasraṣṭre namaḥ **116**

ॐ प्रभवे नमः ॥ ११७ ॥

oṁ prabhave namaḥ **117**



ॐ पायते नमः ॥ ११८ ॥

oṁ pāyate namaḥ **118**

ॐ तपते नमः ॥ ११९ ॥

oṁ tapate namaḥ **119**

ॐ वर्षते नमः ॥ १२० ॥

oṁ varṣate namaḥ **120**

ॐ सुप्तेषु जाग्रते नमः ॥ १२१ ॥

oṁ supteṣu jāgrate namaḥ **121**

ॐ भूतेषु परिनिष्ठिताय नमः ॥ १२२ ॥

oṁ bhūteṣu pariniṣṭhitāya namaḥ **122**

ॐ अग्निहोत्राय नमः ॥ १२३ ॥

oṁ agnihotrāya namaḥ **123**

ॐ अग्निहोत्रिणां फलाय नमः ॥ १२४ ॥

oṁ agnihotriṇāṁ phalāya namaḥ **124**

ॐ परमप्रभवे नमः ॥ १२५ ॥

oṁ paramaprabhave namaḥ **125**

॥ ॐ तत्सत् इति श्री आदित्य

पञ्चविंशत्युत्तरशतनामावलिः संपूर्णम् ॥

Oṁ tatsat iti śrī āditya
pañcaviṁśatyuttaraśatanāmāvaliḥ
saṁpūrṇam

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Oṁ śāntiḥ śāntiḥ śāntiḥ





# Āditya Hṛdayam

॥ श्रीः ॥

**Including the Phalaśrutiḥ**

श्रीगणेशाय नमः

श्रीमद्वाल्मीकिरामायणान्तर्गतं

# आदित्य हृदयम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद्राममगस्त्यो भगवानृषिः ॥ २ ॥

राम राम महाबागो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसे ॥ ३ ॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपं नित्यमक्षय्यं परमं शिवम् ॥ ४ ॥



śrīgaṇeśāya namaḥ

śrīmadvālmīkirāmāyaṇāntargataṁ

# Āditya Hṛdayam

tato yuddhapriśrāntaṁ samare cintayā sthitam
rāvaṇaṁ cāgrato dṛṣṭvā yuddhāya samupasthitam **(1)**

daivataiśca samāgamya draṣṭumabhyāgato raṇam
upagamyābravīdrāmamagastyo bhagavānṛṣiḥ **(2)**

rāma rāma mahābāgo śṛṇu guhyaṁ sanātanam
yena sarvānarīn vatsa samare vijayiṣyase **(3)**

ādityahṛdayaṁ puṇyaṁ sarvaśatruvināśanam
jayāvahaṁ japaṁ nityamakṣayyaṁ paramaṁ śivam **(4)**

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥ ५ ॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥

एष ब्रह्मा च विष्णुश्च शिवस्स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमस्सोमो ह्यपां पतिः ॥ ८ ॥

पितरो वसवस्साध्या अश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥



sarvamaṅgalamāṅgalyaṁ sarvapāpapraṇāśanam
cintāśokapraśamanamāyurvardhanamuttamam **(5)**

raśmimantaṁ samudyantaṁ devāsuranamaskṛtam
pūjayasva vivasvantaṁ bhāskaraṁ bhuvaneśvaram **(6)**

sarvadevātmako hyeṣa tejasvī raśmibhāvanaḥ
eṣa devāsuragaṇān lokān pāti gabhastibhiḥ **(7)**

eṣa brahmā ca viṣṇuśca śivasskandaḥ prajāpatiḥ
mahendro dhanadaḥ kālo yamassomo hyapāṁ patiḥ **(8)**

pitaro vasavassādhyā aśvinau maruto manuḥ
vāyurvahniḥ prajāḥ prāṇa ṛtukartā prabhākaraḥ **(9)**

आदित्यस्सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १० ॥

हरिदश्वस्सहस्रार्चिस्सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनश्शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान् ॥ ११ ॥

हिरण्यगर्भश्शिशिरस्तपनोऽहस्करो रविः ।
अग्निगर्भोऽदितेः पुत्रश्शङ्खश्शिशिरनाशनः ॥ १२ ॥

व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥

आतपी मण्डली मृत्युः पिङ्गलस्सर्वतापनः ।
कविर्विश्वो महातेजा रक्तस्सर्वभवोद्भवः ॥ १४ ॥



ādityassavitā sūryaḥ khagaḥ pūṣā gabhastimān
suvarṇasadṛśo bhānurhiraṇyaretā divākaraḥ **(10)**

haridaśvassahasrārcissaptasaptirmarīcimān
timironmathanaśśambhustvaṣṭā martāṇḍakoṁ’śumān **(11)**

hiraṇyagarbhaśśiśirastapano’haskaro raviḥ
agnigarbho’diteḥ putraśśaṅkhaśśiśiranāśanaḥ **(12)**

vyomanāthastamobhedī ṛgyajussāmapāragaḥ
ghanvṛṣṭirapāṁ mitro vindhyavīthīplavaṅgamaḥ **(13)**

ātapī maṇḍalī mṛtyuḥ piṅgalassarvatāpanaḥ
kavirviśvo mahātejā raktassarvabhavodbhavaḥ **(14)**

नक्षत्रग्रहताराणाम् अधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥ १५ ॥

nakṣatragrahatārāṇām adhipo viśvabhāvanaḥ
tejasāmapi tejasvī dvādaśātmannamo’stu te **(15)**

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥

namaḥ pūrvāya giraye paścimāyādraye namaḥ
jyotirgaṇānāṁ pataye dinādhipataye namaḥ **(16)**

जयाय जयभद्राय हर्यश्वाय नमो नमः
नमो नमस्सहस्रांशो आदित्याय नमो नमः ॥ १७ ॥

jayāya jayabhadrāya haryaśvāya namo namaḥ
namo namassahasrāṁśo ādityāya namo namaḥ **(17)**

नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ॥ १८ ॥

nama ugrāya vīrāya sāraṅgāya namo namaḥ
namaḥ padmaprabodhāya pracaṇḍāya namo’stu te **(18)**

ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥

brahmeśānācyuteśāya sūrāyādityavarcase
bhāsvate sarvabhakṣāya raudrāya vapuṣe namaḥ **(19)**

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥

तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥

नाशयत्येष वै भूतं तमेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥ २४ ॥



tamoghnāya himaghnāya śatrughnāyāmitātmane
kṛtaghnaghnāya devāya jyotiṣāṁ pataye namaḥ **(20)**

taptacāmīkarābhāya haraye viśvakarmaṇe
namastamo'bhinighnāya rucaye lokasākṣiṇe **(21)**

nāśayatyeṣa vai bhūtaṁ tameva sṛjati prabhuḥ
pāyatyeṣa tapatyeṣa varṣatyeṣa gabhastibhiḥ **(22)**

eṣa supteṣu jāgarti bhūteṣu pariniṣṭhitaḥ
eṣa ecaivāgnihotraṁ ca phalaṁ caivāgnihotriṇām **(23)**

devāśca kratavaścaiva kratūnāṁ phalameva ca
yāni kṛtyāni lokeṣu sarveṣu paramaprabhuḥ **(24)**

# ॥ फलश्रुतिः ॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥

अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥ २७ ॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥



# Phalaśrutiḥ

enamāpatsu kṛcchreṣu kāntāreṣu bhayeṣu ca
kīrtayan puruṣaḥ kaścinnāvasīdati rāghava **(25)**

pūjayasvainamekāgro devdevaṁ jagatpatim
etat triguṇitaṁ japtvā yuddheṣu vijayiṣyasi **(26)**

asmin kṣaṇe mahābāho rāvaṇaṁ tvaṁ jahiṣyasi
evamuktvā tato'gastyo jagāma sa yathāgatam **(27)**

etacchrutvā mahātejā naṣṭaśoko'bhavattadā
dhārayāmāsa suprīto rāghavaḥ prayatātmavān **(27)**

ādityaṁ prekṣya japtvedaṁ paraṁ harṣamavāptavān
trirācamya śucirbhūtvā dhanurādāya vīryavān **(28)**

रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत् ।
सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ॥ ३० ॥

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये
आदिकाव्ये युद्धकाण्डे षडुत्तरशततमस्सर्गः ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

॥ ॐ शान्ति शान्ति शान्तिः ॥



rāvaṇaṁ prekṣya hṛṣṭātmā jayārthaṁ samupāgamat
sarvayatnena mahatā vṛtastasya vadhe'bhavat (30)

atha raviravadannirīkṣya rāmaṁ
muditamanāḥ paramaṁ prahṛṣyamāṇaḥ
niśicaramapatisaṁkṣayaṁ viditvā
suragaṇamadhyagato vacastvareti (31)

ityārṣe śrīmadrāmāyaṇe vālmīkīye
ādikāvye yuddhakāṇḍe ṣaḍuttaraśatatamassargaḥ

śrīrāmacandrārpaṇamastu

oṁ śāntiḥ śāntiḥ śāntiḥ

ॐPress

ॐPress